## Draksa

द्राक्षा मधुफलसंज्ञा चारुफला कांक्षमालिका कृष्णा ।
काश्मीरी च रसाला तापसदयिता प्रियाला स्यात् ।।
मृद्वीका स्वादुफला मधुयोनिः स्वादुपाकरसा ।
गोस्तनिका फलमुख्या गदिता कपितेति चौत्तरापथिका ।। (Aa ma)

Synonyms of Draksa are Madhu phala, Caru phala, Kanksamalika, Krsna, Kasmiri, Rasala, Tapasadayita, priyala, Mrdvika, Madhuyoni, Svadu pakarasa, Gostanika, Phalamukhya, Kapita, Uttarapathika.

द्राक्षा स्वादुफला प्रोक्ता तथा मधुरसापि च ।
मृद्वीका हारहूरा च गोस्तनी चापि कीर्त्तिता ।। (Bpn)

Draksa, Svadu phala, Madhu rasa, Mrdvika, Harahura, Gostani are the synonyms of Draksa.

द्राक्षा चारुफला कृष्ण प्रियाला तापसप्रिया ।
गुच्छफला रसाला च ज्ञेयाऽमृतफला च सा ।।
अन्या कपिलद्राक्षा मृद्वीका गोस्तनी च कपिलफला ।
अमृतरसा दीर्घफला मधुवल्ली मधुफला मधूली च ।।
हरिता च हारहूरा सुफला मृद्वी हिमोत्तरपथिका ।
हैमवती शतवीर्या काश्मीरो गजराजमहिगणिता ।।
अन्या सा काकलीद्राक्षा जम्बुका च फलोत्तमा ।
लघुद्राक्षा च निर्बीजा सुवृता रुचिकारिणि ।। (Rjn)

Draksa, Caru Phala, Krsna, Priyala, Tapasapriya, Gucchaphala, Rasala, Amrtaphala are the synonyms of Draksa. Another variety is Kapila draksha, Mrdvika, Gostani, Kapila phala, Amrta rasa, Dirgha phala, Madhu valli, Madhu phala, Madhuli, Harita, Harahura, Suphala, Mrdvi, Himottarapathika, Haimavati, Satavirya, Kasmira, Gajarajamahiganitha. Another variety is Kakali draksha, Jambuka, Phalottama, Laghu draksa, Nirbija, Suvrtta, Ruci karini.

द्राक्षा फलोत्तमा स्वाद्वी हारहूरा च बृंहणी ।

मधुयोनिश्चारुफला रसाला मधुसंभवा ॥
मधुफला स्वादुफला मृद्वीका गोस्तनी गुडा ।
कृष्णा मधुरसा वृष्या परा काश्मीरिका मता ॥ (Kdn)

Draksa, Phalottama, Svadvi, Harahura, Brmhani, Madhu Yoni, Caruphala, Rasala, Madhu sambhava, Madhu phala, Svadu phala, Mrdvika, Gostani, Guda, Krsna, Madhurasa, Vrsya, Kasmirika are the synonyms of Draksa.

द्राक्षा फलोत्तमा वृष्या चक्षुष्या सृष्टमूत्रविट् ।
स्वादुपाकरसा स्निग्धा सकषाया हिमा गुरुः ॥
निहन्त्यनिलपित्तासृक्तिक्तास्यत्वमदात्ययान् ।
तृष्णाकासज्वरश्वासस्वरभेदक्षतक्षयान् ॥ (Mdn)

Draksa is svadu, kashaya in rasa, snigdha, guru in guna, hima in veerya, svadu in paka, phala uttama, vrsya, caksushya, sresta mutra vit, cures anila, pitta, asrk, tikta asya, madatyaya, trsna, kasa, jvara, svasa, svarabheda, ksata and ksaya.

द्राक्षा पक्वा सरा शीता चक्षुष्या बृंहणी गुरुः ।
स्वादुपाकरसा स्वर्या तुवरा सृष्टमूत्रविट् ॥
कोष्ठमारुतकृद् वृष्या कफपुष्टिरुचिप्रदा ।
हन्ति तृष्णाज्वरश्वासवातवातास्रकामलाः ॥
कृच्छ्रापित्तसंमोहदाहशोषमदात्ययान् ।

आमा स्वल्पगुणा गुर्वी सैवाम्ला रक्तपित्तकृत् ॥
वृष्या स्याद् गोस्तनी द्राक्षा गुर्वी च कफपित्तनुत् ।
अबीजाऽन्या स्वल्पतरा गोस्तनीसदृशी गुणैः ॥
द्राक्षा पर्वतजा लघ्वी साम्ला श्लेष्माम्लपित्तकृत् ।
द्राक्षा पर्वतजा यादृक् तादृशी करमर्दिका ॥ (Bpn)

Pakva draksa is svadu, tuvara in rasa, sara, guru in guna, sita in veerya, svadu in paka, caksushya, brmhani,  svaryya, srsta vin mutra, kostha maruta karaka, vrsya, kapha-pusti-ruci prada, cures

trsna, jvara, svasa, vata, vata asra, kamala, krcchra asra, pitta, sammoha, daha, sosa, madatyaya.

Ama is of svalpa guna, amla in rasa, guru in guna, vrsya, induces rakta pitta. Gostani draksa is guru in guna and alleviates kapha, pitta. Abija draksa is svalpa tara, gostani sadrsaihi gunahi. Parvataj draksha is amla in rasa, laghu in guna, slesma-amla-pitta karaka. Karamardika is similar to parvataja draksa.

द्राक्षा हृद्यरसा स्वर्या मधुरा स्निग्धशीतला ।
रक्तपित्तज्वरश्वासतृष्णादाहक्षयापहा ॥
मृद्वीका मधुरा स्निग्धा शीता वृष्यानुलोमनी ।
रक्तानिलश्वासकासभ्रमस्तृष्णाज्वरापहा ॥ (Dhn)

Draksa is madhura in rasa, hrdya rasa, snigdha in guna, sitala in veerya, svarya, cures rakta pitta, jvara, svasa, trsna, daha, ksaya. Mrdvika is madhura in taste, snigdha in property, sita in potency, vrsya, anulomani, cures rakta, anila, svasa, kasa, bhrama, trsna, jvara.

द्राक्षाऽतिमधुराऽम्ला च शीता पित्तार्त्तिदाहजित् ।
मूत्रदोषहरा रुच्या वृष्या सन्तर्पणी परा ॥
गोस्तनी मधुरा शीता हृद्या च मदहर्षणी ।
दाहमूर्च्छाज्वरश्वासतृषाहृल्लासनाशिनी ॥

द्राक्षाबालफलं कटूष्णविशदं पित्तास्नदोषप्रदं

मध्यं चाम्लरसं रसान्तरगते रुच्यातिवह्निप्रदम् ।

पक्वं चेन्मधुरं तथाऽम्लसहितं तृष्णास्रपित्तापहं ॥

पक्वं शुष्कतमं श्रमार्त्तिशमनं सन्तर्पणं पुष्टिदम् ॥
शीता पित्तास्रदोषं दमयति मधुरा स्निग्धपाकाऽतिरुच्या
चक्षुष्या श्वासकासश्रमवमिशमनी शोफतृष्णाज्वरघ्नी ।

दाहाध्मानभ्रमादीनपनयति परा तर्पणी पक्वशुष्का
द्राक्षा सुक्षीणवीर्यानपि मदनकलाकेलिक्षान्विधत्ते ॥ (Rjn)

Draksa is atimadhura, amla in rasa, sita in veerya, rucya, vrsya, santarpani para, cures pitta, arti, daha, mutra dosha. Gostani is madhura in rasa, sita in veerya, hrdya, mada harsani, cures daha, murccha, jvara, svasa, trsa, hrllasa.

Draksa bala phala is katu in rasa, usna in veerya, visada, pitta-asra dosha prada.

Madyama phala is amla in taste, rucya ati, vahni prada.

Pakva phala is madhura in rasa, amla sahita, cures trsna, alleviates asra and pitta.

Pakva suska is madhura in rasa, snigdha in guna, sita in veerya, tama, santarpana, pustida, ati rucya, caksushya, tarpani, cures srama, arti, pitta asra dosha, svasa, kasa, srama, sopha, trsna, jvara, daha, adhmana, bhrama.
Pakva suska draksa provides strength in persons with ksina veerya.

द्राक्षा फलोत्तमा वृष्या चक्षुष्या सृष्टमूत्रविट् ।
स्वादुपाकरसा स्निग्धा सकषाया हिमा गुरुः ॥
निहन्त्यनिलपित्तासृक्तिक्तास्यत्वमदात्ययान् ।
तृष्णाकासज्वरश्वासस्वरभेदक्षतक्षयान् ॥

आमा द्राक्षा सरा साम्ला पित्तश्लेष्मप्रकोपनी ।(Sdn)

Draksa is phala uttama, svadu, kasaya in rasa, snighda, guru in guna, hima in veerya, svadu in paka, vrsya, caksushya, srsta mutra vit, cures anila, pitta, asra, tikta asya, madatyaya, trsna, kasa, jvara, svasa, svarabheda, ksata, kshaya.

Ama draksa is amla in rasa, sara in guna, induces vitiation of pitta, slesma.

द्राक्षा तु मधुरा स्निग्धा वृष्या शीतानुलोमनी ।
बल्या वृष्या क्षतक्षीणतृषावातस्रपित्तजित् ।। (Rav)

Draksa is madhura, snigdha in property, sita in potency, vrsya, anulomana, balya, vrsya, cures ksata, ksina, trsa, vata, asra, pitta.

तृष्णादाहज्वरश्वासरक्तपित्तक्षतक्षयान् ।
वातपित्तमुदावर्त्तं स्वरभेदं मदात्ययम् ।।
तिक्तास्यतामास्यशोषं कासं चाशु व्यपोहति ।
मृद्वीका बृंहणी वृष्या मधुरा स्निग्धशीतला ।। (C.S.Su २७)

Draksa alleviates trsna, daha, jvara, svasa, raktapitta, ksata, kshaya, vatapitta, udavarta, svarabheda, madatyaya, tikta asya, sosa, kasa. Mrdvika is madhura in taste, snigdha in property, sitala in potency, brmhani and vrsya,

द्राक्षा फलोत्तमा वृष्या चक्षुष्या सृष्टमूत्रविट् ।
स्वादुपाकरसा स्निदग्धा सकषाया हिमा गुरुः ।।
निहन्त्यनिलपित्तास्रतिक्तास्यत्वमदात्ययान् ।
तृष्णाकासश्रमश्वासस्वरभेदक्षतक्षयान् ।। (A.Hr.Su ६)

Draksa phala is svadu, kasaya in rasa, snigdha, guru in guna, hima in veerya, svadu in paka, uttama, vrsya, caksushya, srsta mutra vit, cures anila, pitta, asra, tikta asya, madatyaya, trsna, kasa, srama, svasa, svara bheda, ksata, kshaya.

मधुरा मधुराम्ला च द्राक्षेति द्विविधा मता ।
मधुरा वातपित्तघ्नी साम्ला तु कफपित्तकृत् ।।

आमा साम्लगुणा गुर्वी सैवाम्ला रक्तपित्तकृत् ।
द्राक्षाम्लोष्णा सरा गुर्वी वातघ्नी कफपुत्तदा ।।

पक्वा स्निग्धा रसा स्वर्या स्वादुपाकरसा हिमा ।
हृद्या सा तुवरा वृष्णा चक्षुष्या सृष्टमूत्रविट् ॥
कोष्ठमारुतकृद्गुर्वी कफपुष्टिरुचिप्रदा ।
निहन्ति वातपित्तास्रतिक्तास्यत्वक्षतक्षयान् ॥
रक्तपित्तज्वरश्वासतृष्णादाहमदात्ययान् ।
तद्वद् गोस्तनिका द्राक्षा स्वाद्वी वृष्यतमा मता ॥ (Kdn)

Madhura and Madhura amla are the 2 types of draksha. Madhura is Vata Pitta hara, Amla is Kapha Pitta karaka.

Ama phala is of Amla guna, Guru, Amla in Taste, Rakta pitta karaka, Usna in Potency, Sara in Property, Vataghna, Kapha Pitta da.

Pakva is Snigdha, Sara in Property, Svarya, Svadu in Paka and Rasa, Hima in Potency, Hrdya, Tuvara in Taste, Vrsya, Caksushya, Srsta Mutra Vit, Kostha Maruta karaka, Guru in Property, Kapha-Pusti-Ruci prada, Pacifies Vata, Pitta, Asra, Tikta Asya, Ksata, Ksaya, Rakta Pitta, Jvara, Svasa, Trsna, Daha, Madatyaya. Gostani Draksa is Svadvi, Vrsya tama.

द्राक्षा पक्वा सरा शीता चक्षुष्या बृंहणी गुरुः ।
हन्ति तृष्णाज्वरश्वासवान्तिवातास्रकामलाः ॥
कृच्छ्रास्रपित्तसम्मोहदाहशोषमदात्ययान् ।

आमा साऽल्पगुणा गुर्वी सैवाम्ला रक्तपित्तकृत् ॥
निर्वीर्याऽन्या लघुद्राक्षा गौस्तनीदृशा गुणैः ।
द्राक्षा पर्वतजा लघ्वी साम्ला श्लेष्माम्लपित्तनुत् ॥ (Mpn)

Pakva Draksa is Sara in Property, Sita in Potency, Caksushya, Brmhani, Guru in Property, cures Trsna, Jvara, Svasa, Vanti, Vata asra, Kamala, Krcchra asra, Pitta, Sammoha, Daha, Sosa, Madatyaya.

Ama is Alpa guna, Guru in Property, Amla in Taste, Rakta PItta karaka, Nirvirya. Laghu Draksha is Gostana sadrsa and in Guna.

Parvataja Draksha is Laghu in Property, Amla in Taste, Slesma-Amla Pitta hara.